शुक्लयजुर्वेदीय

# गर्भाधानादि-षोडश-संस्कार-पद्धतिविमर्शः

लेखक

महामहोपाध्याय

आचार्य केदारनाथ द्विवेदी

संपादक

विद्यावाचस्पति

डा. देवेन्द्र प्रसाद मिश्र

# SHUKLAYAJURVEDIEY GHARBHADANADI-SODASH-SANSKAR-PADDHATIVIMARSHAH

by

**Mahamahopadhyay Acharya Kedarnath Dwivedi**

© सर्वाधिकारो रचनाकाराधीनः

ISBN : 978-93-83517-29-9

**प्रकाशक**
**जी. एच. पब्लिकेशन**
121, शहरारा बाग,
प्रयागराज-211003
मो. 9532481205
email—ghpublication@gmail.com

संस्करण : **प्रथम 2020**

लेजर कम्पोजिंग
**एसके कम्प्यूटर्स**
इलाहाबाद, मो. 9198808690

मुद्रक
**भार्गव ऑफसेट**, प्रयागराज

मूल्य :
**₹ 350.00**

- भूमिका 7
- आत्म-निवेदनम् 9
- पुरोवाक् 11
- प्रशस्तिपत्रम् 12
- सम्मतिः 13
- प्रस्तावना 15


# विषयानुक्रमणिका

## भाग–1


1. अथ गर्भाधानसंस्कारः 21
2. संकल्पः 26
3. षोडशमातृकापूजनम् 35
4. वसोर्धारापूजनम् 37
5. अथनान्दीश्राद्धम् 38
6. कर्मकाण्ड–सम्पादकानांब्राह्मणां वरणम् 39
7. कर्मकाण्ड–रक्षाविधानम् 41
8. भूमिप्रोक्षणम् अग्निस्थापनञ्च 42
9. ग्रहपूजनम् 42
10. अधिदेवतानां स्थापनम् 44
11. प्रत्यधिदेवानां स्थापनम् 45
12. दिक्पालपूजनम् 47
13. पञ्चपालपूजनम् 48


## भाग–2


14. यजमानकर्तृकाज्यस्थालीपाकहोमः 51
15. प्रधानदेवताहोमः 51
16. आज्यस्थलीपाकहोमः 52
17. पायसचरुहोमः 53
18. अथाभिषेकः 58
19. अथ पुंसवनम् 60

# अथ गर्भाधानसंस्कारः

**गर्भाधानस्य आवश्यकता**–जायमानो वै ब्राह्मणस्त्रिभिर्ऋणवान् जायते ब्रह्मचर्येण ऋषिभ्यो यज्ञेन देवेभ्यः प्रजयापितृभ्यः।। एष वा अनृणो यः पुत्री यज्वा ब्रह्मचारी वा स्यादिति।।

**गर्भाधानप्रकारः**–अथ यामिच्छेत्। गर्भं दधीतेति तस्यामर्थं निष्ठाप्य मुखेन मुखं सन्धायापान्याभिप्राण्थाद् इन्द्रियेण ते रेतसा रेत आदधामीति गर्भिण्येव भवति।।

(बृहदराण्यकोपनिषद्)

**संस्कारकर्त्ता**–पतिरेव संस्कारस्य कर्त्ता स्यान्नान्यः। पत्युरशक्तेसति तस्य–प्रतिनिधिरपिसमर्थः स्यात्। यथा–

**देवराद्वा सपिण्डाद्वा स्त्रियासम्यक् नियुक्तया**
**प्रजेप्सिताधिमन्तव्या सन्तानस्य परिक्षये।।**

मनुस्मृतिः 9/59

**बीजार्थं ब्राह्मणः कश्चित् धनेनोपनिमन्त्र्यताम्।। (महा.)**

**अपुत्रां गुर्वनुज्ञातो देवरः पुत्रकाम्यया।**
**सपिण्डो वा सगोत्रो वा घृताभ्यक्तः ऋतावियात्।।**

(याज्ञ. स्मृतिः 1/38)

**गर्भाधानादिसंस्कर्त्ता पिता श्रेष्ठतमः स्मृतः।**
**अभावे स्वकुलीनः स्यात् बान्धवो वा अन्यगोत्रजः।।**

(वीरमित्रोदयात् उद्धृतः)

**पत्यौ मृते वा पतिते सन्यस्ते वा विदेशगे।**
**तद् गोत्रजेन श्रेष्ठेन कार्यः पुंसवनादया।।**

(वीरमित्रोदयः)

**विधवायां प्रजोत्पत्तौ देवरस्य नियोजनम्।।**

(नारदस्मृतिः)

**संस्काराल्लाभः**

**लोकानन्त्यं दिवः प्राप्तिः पुत्रपौत्रप्रपौत्रकैः।**
**यस्मात्तस्मात् स्त्रियःसेव्याः कर्त्तव्याश्च सुरक्षिताः।।**

संस्कृतविश्वविद्यालय-ग्रन्थमालाया: 115 पुष्पम्

# यजुर्वेदे वैश्विकचिन्तनम्




प्रधानसम्पादक:

म.म. प्रो. मुरलीमनोहरपाठक:

कुलपति:

[illegible]क:

[illegible]प्रसादमिश्र:

शोध-प्रकाशनविभाग:

श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालय:

नवदेहली-110016

संस्कृतविश्वविद्यालयस्य ग्रन्थमालायाः 115 तमं पुष्पम्

# यजुर्वेदे वैश्विकचिन्तनम्

प्रधानसम्पादकः

**म.म. प्रो. मुरलीमनोहरपाठकः**

कुलपतिः

लेखकः

**म.म. डॉ. देवेन्द्रप्रसादमिश्रः**

**श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः**

(केन्द्रीयविश्वविद्यालयः)

नवदेहली-110016

प्रकाशकः
श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः
(केन्द्रीयविश्वविद्यालयः)
बी-4, कुतुबसांस्थानिककक्षेत्रम्
नवदेहली-110016

आई.एस.बी.एन : 81-87987-92-0

वर्षम् : 2022

©श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयस्य

मूल्यम् : ₹ 600/-

मुद्रकः
डी.वी. प्रिंटर्स
97 जवाहरनगरम्, कमलानगरम्,
देहली-110007

# अथ प्रथमोऽध्यायः

## वेदपदार्थः

नमोऽस्तु रामाय सलक्ष्मणाय देव्यै च तस्यै जनकात्मजायै।
नमोऽस्तु रुद्रेन्द्रयमानिलेभ्यो नमोऽस्तु चन्द्रार्कमरुद्गणेभ्यः॥[1]

गुर्वर्थे त्यक्तराज्यो व्यचरदनुवनं पद्मपद्भ्यां प्रियायाः
पाणिस्पर्शाक्षमाभ्यां मृजितपथिरुजो यो हरीन्द्रानुजाभ्याम्।
वैरूप्याच्छूर्पणख्याः प्रियविरहरुषाऽऽरोपितभ्रूविजृम्भ-
त्रस्ताब्धिर्बद्धसेतुः खलदवदहनः कोसलेन्द्रोऽवतान्नः॥[2]

यो ददाति सतां शम्भुः कैवल्यमपि दुर्लभम्।
खलानां दण्डकृद्योऽसौ शङ्करः शं तनोतु मे॥[3]

त्वा वन्दामह इत्युवाच निगमस्त्वद्भूतिमुल्लासयन्
पापिष्ठेष्वपि ते दयेति कथयद्रामायणं जीवति।
हे सीते जगदम्ब पुण्यचरिते पाहीति शब्दापयन्
मातस्त्वत्सुकुमारमञ्जुचरणच्छायाश्रितः स्यां कदा॥
यत्सन्धुक्षणमापयद्दिविषदो लोकाधिपत्यं पुरा
यल्लब्ध्वा विहरन्ति धाम्नि परमे भक्तास्त्वदेकाश्रयाः।

---

[1] श्रीमद्वाल्मीकीयरामायणे ५.१३.५७

[2] श्रीमद्भागवते ९.१०.४

[3] श्रीमद्रामचरितमानसं लङ्काकाण्डस्य मङ्गलपद्यम्